# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – शास्त्री (SEM-4)** **प्रश्नपत्रम् – 6** गुणाः –70

विषयः – धर्मशास्त्रम् **कोड –C. C.-2.4.8** समयः - 3 तः 6 पर्यन्तम्

दिनाङ्कः –04/04/2019 सन्दर्भग्रन्थः – मनुस्मृतिः

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः-1 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

(1) आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि।
अत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥

(2) उत्थाय पश्चिमे यामे कृतशौचः समाहितः।
हुताग्निर्ब्राह्मणांश्चार्च्य प्रविशेत्स शुभां सभाम् ॥

(3) वृद्धांश्च नित्यं सेवेत विप्रान्वेदविदः शुचीन्।
वृद्धसेवी हि सततं रक्षोभिरपि पूज्यते ॥

**प्रश्नः-2 एकस्य उत्तरं दत्त। 10**

(1) राजप्रशंसां विधाय राजधर्मान् वर्णयत।

(2) दूतलक्षणं दूतप्रशंसां च विधाय राष्ट्ररक्षां विवेचयत।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः-3 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

(1) द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः।
रात्रिः संध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम् ॥

(2) यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राज्ञश्चाधिकृतो विद्वान्ब्राह्मणस्तां सभां विदुः ॥

(3) दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम्।
राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम् ॥

**प्रश्नः-4 एकस्य समीक्षा कार्या। 10**

(1) साक्षिविभावनां मिथ्यासाक्ष्ये दोषं च विलिख्य अनृतकथनप्रायश्चित्तं समीक्षत।

(2) दण्डभेदान् विवर्ण्य ऋणादाने दण्डनियमम् अधर्मदण्डनिन्दां विवेचयत।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः-5 द्वयोः ससन्दर्भं व्याख्या कार्या।** **10**

(1) अनेन विधिना राजा कुर्वाणः स्तेननिग्रहम्।
यशोऽस्मिन्प्राप्नुयाल्लोके प्रेत्य चानुत्तमं सुखम्॥

(2) न ब्राह्मणवधाद्य भूयानधर्मो विद्यते भुवि।
तस्मादस्य वधं राजा मनसाऽपि न चिन्तयेत्॥

(3) धर्मार्थं येन दत्तं स्यात्कस्मैचिद्याचते धनम्।
पश्चाञ्च न तथा तत्स्यान्न देयं तस्य तद्भवेत्॥

**प्रश्नः-6 एकस्य सारमात्रं लिखत।** **10**

(1) सुवर्णादिहरणे, कुलपुरोहितत्यागे तन्तुवायस्य च सूत्रहरणे दण्डः।

(2) भार्यादिताडने स्तेननिग्रहणे च कीदृशः दण्डः?

**प्रश्नः-7 दशानां लघूत्तरेण लिखत।** **10**

(1) सर्वस्य परिरक्षणं केन कर्तव्यम्?

(2) राजा कस्यांशेन समुद्भवति?

(3) भूमिपः - इत्यस्य कोऽर्थः?

(4) पाञ्चभौतिकं दण्डं कः सृष्टवान्?

(5) कः सुप्तेषु जागर्ति?

(6) प्रजाः सर्वाः कः अभिरक्षति?

(7) कः प्रजाः वशे स्थापयितुं शक्नोति?

(8) पार्थिवः - इत्यस्य कोऽर्थः?

(9) स्त्रीणां साक्ष्यं के कुर्युः?

(10) वर्णाः कति? के च ते?

(11) मिथः - इत्यस्य कोऽर्थः?

(12) किल्बिषम् अर्थात् किम्?

(13) अष्टमाध्यायस्य नाम किम्?

(14) कस्मिन् मासि यायाद्यात्रां महीपतिः?

(15) पुरुषार्थाः कति? के च ते?